**सप्तमः पाठः**

# महाजनो येन गतः स पन्थाः

**महाकवीनां काव्येषु सुभाषितानाम् अपूर्वः कोषः भवति। यथा विविध-वर्णपुष्पाणां शोभया विभूषितम् उपवनं लोकानां चित्तं बलाद् आकर्षति तथा सत्कवीनां काव्येभ्यः सङ्कलितानि पद्यरत्नानि सहृदयानां पाठकानां मनांसि रञ्जयन्ति।**
**अस्मिन् पाठे पुण्यभूमेः भारतस्य वन्दना, विद्यायाः उपयोगिता, समयस्य महिमा, परोपकारस्य गरिमा, सांसारिकानां पदार्थानाम् असारता, सज्जनदुर्जनानां प्रकृतिविभेदः, धर्मस्य गहनता, महापुरुषाणां मार्गानुसरणस्य श्रेष्ठता च प्रतिपादिता अस्ति।**

1. ***गायन्ति देवाः किल गीतकानि***
***धन्यास्तु ते भारतभूमिभागे।***
***स्वर्गापवर्गास्पदमार्गभूते***
***भवन्ति भूयः पुरुषाः सुरत्वात्॥***

***अन्वयः*** - देवाः किल गीतकानि गायन्ति। ते पुरुषाः तु धन्याः (ये) स्वर्गापवर्गास्पदमार्गभूते भारतभूमिभागे सुरत्वात् भूयः भवन्ति।

2. ***विद्या समुन्नतिपथं विशदीकरोति***
***बुद्धिं विचारविषये प्रखरीकरोति।***
***कर्तव्यपालनपरां धियमादधाति***
***विद्या सखा परमबन्धुरथेह लोके॥***

***अन्वयः*** - विद्या समुन्नतिपथम् विशदीकरोति, विचारविषये बुद्धिम् प्रखरीकरोति, कर्तव्यपालनपराम् धियम् आदधाति, इह लोके विद्या सखा अथ परमः बन्धुः।

3. ***नष्टं द्रव्यं प्राप्यते ह्युद्यमेन***
***नष्टा विद्या प्राप्यतेऽभ्यासयुक्त्या ।***

***नष्टारोग्यं सूपचारैः सुसाध्यं***
***नष्टा वेला या गता सा गतैव ॥***

***अन्वयः***– नष्टम् द्रव्यम् हि उद्यमेन प्राप्यते, नष्टा विद्या अभ्यासयुक्त्या प्राप्यते । नष्टारोग्यम् सूपचारैः सुसाध्यम्, या नष्टा वेला गता सा गता एव ।।

4. ***पद्मकरं दिनकरो विकचीकरोति***
***चन्द्रो विकासयति कैरवचक्रवालम् ।***

***नाभ्यर्थितो जलधरोऽपि जलं ददाति***
***सन्तः स्वयं परहितेषु कृताभियोगाः ॥***

***अन्वयः***– दिनकरः नाभ्यर्थितः (सन् अपि) पद्माकरम् विकचीकरोति, चन्द्रः कैरवचक्रवालम् विकासयति, जलधरः नाभ्यर्थितः अपि जलम् ददाति, सन्तः स्वयम् परहितेषु कृताभियोगाः (भवन्ति) ।

5. ***भोगा न भुक्ताः वयमेव भुक्ताः***
***तपो न तप्तं वयमेव तप्ताः ।***

***कालो न यातो वयमेव याताः***
***तृष्णा न जीर्णा वयमेव जीर्णाः ॥***

***अन्वयः***– भोगाः न भुक्ताः वयम् एव भुक्ताः, तपः न तप्तम् वयम् एव तप्ताः । कालः न यातः वयम् एव याताः, तृष्णा न जीर्णा वयम् एव जीर्णाः ।

6. ***कटु क्वणन्तो मलदायकाः खलाः***
***तुदन्त्यलं बन्धनशृङ्खला इव ।***

***मनस्तु साधुध्वनिभिः पदे पदे***
***हरन्ति सन्तो मणिनूपुरा इव ॥***

***अन्वयः***– कटु क्वणन्तः मलदायकाः खलाः बन्धनशृङ्खला इव अलम् तुदन्ति । सन्तः मणिनूपुराः इव साधुध्वनिभिः पदे पदे मनः हरन्ति ।

7. ***तर्कोऽप्रतिष्ठः श्रुतयो विभिन्नाः***
***नैको मुनिर्यस्य मतं प्रमाणम् ।***
***धर्मस्य तत्त्वं निहितं गुहायाम्***
***महाजनो येन गतः स पन्थाः ॥***

***अन्वयः***- तर्कः अप्रतिष्ठः श्रुतयः विभिन्नाः एकः मुनिः न यस्य मतम् प्रमाणम् । धर्मस्य तत्त्वम् गुहायाम् निहितम्, येन महाजनः गतः सः पन्थाः ।

## *अनुप्रयोगः*

1. **अधोलिखितान् शब्दान् उच्चैः पठत, सञ्चिकायां च लिखत -**

क. तर्कोऽप्रतिष्ठः, प्राप्यतेऽभ्यासयुक्त्या, जलधरोऽपि
ख. अभ्यर्थितः, ह्युद्यमेन, परमबन्धुरथेह

2. **'अ' स्तम्भस्य श्लोकांशाः 'ब' स्तम्भस्य श्लोकांशैः सह संयोज्यन्ताम् -**

| | ***अ*** | ***ब*** |
|---|---|---|
| क. | गायन्ति देवाः किल गीतकानि | नष्टा वेला या गता सा गतैव । |
| ख. | विद्या समुन्नतिपथं विशदीकरोति | महाजनो येन गतः स पन्थाः । |
| ग. | नष्टारोग्यं सूपचारैः सुसाध्यं | सन्तः स्वयं परहितेषु कृताभियोगाः । |
| घ. | कटु क्वणन्तो मलदायकाः खलाः | बुद्धिं विचारविषये प्रखरीकरोति । |
| ङ. | नाभ्यर्थितो जलधरोऽपि जलं ददाति | तृष्णा न जीर्णा वयमेव जीर्णा । |
| च. | धर्मस्य तत्त्वं निहितं गुहायां | तुदन्त्यलं बन्धनशृङ्खला इव । |
| छ. | कालो न यातो वयमेव याताः | धन्यास्तु ते भारतभूमिभागे । |

3. **अधोलिखितेषु पदेषु सन्धिं सन्धिच्छेदं वा कृत्वा रिक्तस्थानानि पूरयत -**

| | | |
|---|---|---|
| क. | .................................. | प्राप्यते + अभ्यासयुक्त्या |
| ख. | जलधरोऽपि | ............... + ................... |
| ग. | .................................. | धन्याः + तु |

| | | |
|---|---|---|
| घ. | तर्कोऽप्रतिष्ठः | ............... + .................... |
| ङ | .................................. | परमबन्धुः + अथ + इह |
| च. | नैकोमुनिर्यस्य | ....... + ....... + ....... + ....... |
| छ. | ................................. | तुदन्ति + अलम् |
| ज. | मनस्तु | ............... + ..................... |

## 4. पाठात् विचित्य समस्तपदानि रचयत –

| | *विग्रहः* | *समस्तपदम्* | *समासनाम* |
|---|---|---|---|
| क. | भारतभूमेः भागः | ................................. | षष्ठीतत्पुरुषः |
| ख. | दिनं करोति इति | ................................. | उपपदतत्पुरुषः |
| ग. | साधुभिः ध्वनिभिः | ................................. | कर्मधारयः |
| घ. | महान् जनः | ................................. | कर्मधारयः |
| ङ | कर्तव्यस्य पालने परां ताम् | ................................. | सप्तमीतत्पुरुषः |
| च. | बन्धनाय शृङ्खला | ................................. | चतुर्थीतत्पुरुषः |
| छ. | मणिजटिताः नूपुराः | ................................. | मध्यमपदलोपी तत्पुरुषः |
| ज. | परेषां हितेषु | ................................. | षष्ठीतत्पुरुषः |

## 5. अधोलिखितानां वाक्यानां कर्तृवाच्ये परिवर्तनं कुर्वन्तु –

| | *कर्मवाच्ये* | *कर्तृवाच्ये* |
|---|---|---|
| | *यथा–देवैः गीतकानि गीयन्ते ।* | *देवाः गीतकानि गायन्ति ।* |
| क. | विद्यया समुन्नतिपथः विशदीक्रियते । | .................................................. |
| ख. | दिनकरेण पद्माकरः विकचीक्रियते । | .................................................. |
| ग. | चन्द्रेण कैरवचक्रवालः विकास्यते । | .................................................. |
| घ. | जलधरेण जलं दीयते । | .................................................. |

ङ मलदायकैः खलैः सज्जनाः तुद्यन्ते । .................................................

च. सद्भिः मनः ह्रियते । .................................................

**6.( अ ) पाठात् उपयुक्तानि पदानि चित्वा अधोलिखिततालिकायां रिक्तस्थानानि पूरयन्तु -**

| | *विशेषणपदानि* | *विशेष्यपदानि* |
|---|---|---|
| क. | नष्टम् | ............................ |
| ख. | ............................ | भोगाः |
| ग. | याताः | ............................ |
| घ. | ............................ | तृष्णा |
| ङ | मलदायकाः | ............................ |
| च. | ............................ | श्रुतयः |
| छ. | नष्टा | ............................ |
| ज. | ............................ | तपः |

**6.( ब ) विलोमपदानि पाठात् चित्वा लिखत -**

| | *पदानि* | *विलोमपदानि* |
|---|---|---|
| क. | दानवाः | ............................ |
| ख. | अधर्मः | ............................ |
| ग. | नरकम् | ............................ |
| घ. | मधुरम् | ............................ |
| ङ | दुर्जनः | ............................ |
| च. | अकर्तव्यम् | ............................ |

**7. प्रश्नान् उत्तरत –**

क. धर्मस्य तत्त्वं कुत्र निहितम् अस्ति ?

ख. का जीर्णा न भवति ?

ग. सज्जनाः कथं मनः हरन्ति ?

घ. कः स्वयम् एव जलं ददाति ?

ङ. नष्टारोग्यं कैः सुसाध्यं भवति ?

च. विद्या किं करोति ?

**8. अधोलिखिताः सूक्तीः पठित्वा समभावसूक्तयः पाठात् विचित्य तत्समक्षं लिखत –**

क. दुर्लभं भारते जन्म मानुष्यं तत्र दुर्लभम् ।

..............................................................................................................

ख. गतः कालः कृते प्रयत्नेऽपि पुनः न आयाति ।

..............................................................................................................

ग. अयाचितः अपि मेघः जलं ददाति ।

..............................................................................................................

घ. सः तु भवति दरिद्रः यस्य तृष्णा विशाला ।

..............................................................................................................

ङ विद्या बन्धुः विदेशगमने ।

..............................................................................................................

च. परोपकाराय सतां विभूतयः ।

..............................................................................................................

**9. अन्वयं पूरयत -**

क. देवाः किल .................................. गायन्ति । ते पुरुषाः तु .............................. (ये) स्वर्गापवर्गास्पदमार्गभूते ............................ सुरत्वात् भूयः भवन्ति ।

ख. तर्कः ........................ श्रुतयः विभिन्नाः, एकः मुनिः न यस्य .................... प्रमाणम् । धर्मस्य तत्त्वं गुहायां ................, येन महाजनः गतः स पन्थाः ।

ग. विद्या समुन्नतिपथं ...................... करोति विचारविषये ............... प्रखरीकरोति, कर्तव्यपालनपरां धियम् आदधाति, इह लोके ................ सखा अथ परमः बन्धुः ।

**10. पाठगतश्लोकानां भावस्पष्टीकरणम् उचितपदैः कुर्वन्तु -**

क. संसारे ...................................... अपि सन्ति दुर्जना अपि । तयोः व्यवहारे महान् भेदः । ......................... कटु भाषन्ते कुव्यवहारं च कुर्वन्ति । ते ...................... इव मानवं पीडयन्ति किन्तु सज्जनाः मणिनूपुराः इव भवन्ति । ते ................... वदन्ति प्रियं च कुर्वन्ति ।

ख. .................. इयं प्रकृतिः भवति यत् ते स्वयम् एव परेषां हितम् आचरन्ति । सूर्यः स्वयमेव ................... विकासयति । ............ स्वकिरणैः कुमुदानां विकासं करोति । मेघाः स्वयमेव .............. कृत्वा लोकस्य उपकारं कुर्वन्ति ।

ग. जीवनकालः स्वल्पः किन्तु .......................... अनन्ताः । ते अस्मिन् स्वल्पकाले भोक्तुं न शक्यन्ते । तपः अपि ............... न शक्यते । आयुषः अन्तः भवति न तु कालस्य । वयं ............... भवामः किन्तु तृष्णा सदा तरुणी तिष्ठति । एतद् ....................... मानवजीवनस्य सत्यम् ।

## पाठविकासः

**क. पाठे सङ्कलितानां सुभाषितानां सन्दर्भाः**

| *श्लोकसङ्ख्या* | *सन्दर्भग्रन्थाः* |
|---|---|
| 1. | विष्णुपुराणम् |
| 2. | वैद्यकीयसुभाषिताम् |

3. नीतिशतकम्

4. वैराग्यशतकम्

5. कादम्बरीमुखम्

6. महाभारतम्

## ख. समानान्तरसूक्तयः

- विद्या मित्रं प्रवासेषु। *(चाणक्यनीतिः 5/15)*
- लोभेन बुद्धिश्चलति, लोभो जनयते तृषाम्
  तृषार्तो दुःखमाप्नोति, परत्रेह न मानवः॥ *(हितोपदेशः मित्रलाभः /140)*
- स तु भवति दरिद्रो यस्य तृष्णा विशाला
  मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः॥ *(वैराग्यशतकम् /45)*
- व्यर्थः कालातिपातो न, कर्तव्यश्चतुरैर्नरैः
  गतः कालः प्रयत्नेऽपि, पुनर्नायाति कर्हिचित्॥

## 'च्वि' प्रत्ययः

'च्वि' प्रत्ययः अभूततद्भावार्थकः। यद् वस्तु पूर्वं यस्मिन् रूपे न आसीत्, किन्तु सम्प्रति तत् परिवर्तितं रूपं धारयति, एतस्य बोधनाय 'च्वि' प्रत्ययः प्रयुज्यते।

एषः प्रत्ययः 'कृ-भू-अस्' धातूनाम् एव योगे भवति। प्रक्रियायां प्रत्ययः लुप्तः भवति। पूर्वपदस्य अन्तिमः अकारः आकारः वा ईकाररूपं धारयति। पूर्वपदस्य अन्ते यदि स्वराः भवन्ति ते दीर्घाः जायन्ते।

### *उदाहरणानि*

अकृष्णः कृष्णः क्रियते = कृष्णीक्रियते

(कृष्ण + च्वि + क्रियते = कृष्ण + ई + क्रियते)

अविशदं विशदं करोति = विशदीकरोति

अप्रखरं प्रखरं करोति = प्रखरीकरोति

अविकचं विकचं करोति = विकचीकरोति